**प्रात : 06:55**

**दिनाङ्कः-06/10/2023**

**प्रधानमन्त्री/राजस्थान-मध्यप्रदेश-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः मध्यप्रदेशस्य जबलपुरनगरे षट्शताधिक-द्वादश-सहस्र-कोटि-रूप्यकाणां विकास-परियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। इतः पूर्वं प्रधानमन्त्रिणा उक्तं यत् केन्द्रप्रशासनं राजस्थाने रेलमार्ग-सम्बद्धायाः आधारभूत-सरञ्चनायाः विकासाय कार्यं करोति। राजस्थानस्य जोधपुरे तेन उक्तं यत् केन्द्रं प्रत्येकस्मिन् क्षेत्रे तीव्रगत्या विकासाय कार्यं समाचरति। प्रधानमन्त्री अवदत् यत् रेल-विकासाय राजस्थानाय पञ्चनवत्यर्बुद-रूप्यकाणि आवण्टितानि । एतत् विगत-प्रशासनस्य वार्षिक-सामान्याय-व्यय-प्रपत्रात् भूयोऽपि चतुर्दशगुणात्मकम् अधिकमस्ति।

प्रधानमन्त्री उक्तवान् यत् स्वतन्त्रतायाः अनन्तरं चतुर्दशाधिक-द्विसहस्र-वर्षं यावत् राजस्थाने प्रायशः षड्-शत-किलोमीटर्-मितात्मिकायाः रेल-पट्टिकायाः विद्युतिकरणं जातम्। अपरतः, विगतेषु नववर्षेषु सप्तत्रिंशत्-शत- किलोमीटर्-मितात्मिकायाः रेलपट्टिकायाः विद्युतिकरणं सञ्जातम्।

**मध्यप्रदेशः/महिलारक्षणम्**

मध्यप्रदेश-प्रशासनेन वनविभागं विहाय सर्वेषु सर्वकारीय-वृत्यवसरेषु महिलाभ्यः पञ्चत्रिंशत्-प्रतिशतमितस्य आरक्षणस्य घोषणा विहिता। अवधेयं अस्ति यत् राज्ये महिलाभ्यः पञ्चत्रिंशत्-प्रतिशतम् आरक्षणं प्रदातुम् मध्यप्रदेश-लोक-सेवा-नियमावल्यां यस्यां महिलानां नियुक्त्यर्थं विशेष-प्रावधानमासीत् तस्यां संशोधनम् मध्यप्रदेश-प्रशासनेन कृतम्। मुख्यमन्त्रिणा शिवराजसिंह-चौहानेन साम्प्रतिके समये आरक्षिपदेषु अन्येषु च सर्वकारीय-पदेषु पञ्चत्रिंशत्-प्रतिशत-रिक्तस्थानेषु महिलानाम् आरक्षणस्य घोषणा कृतासीत्। मध्यप्रदेशः प्रथमं राज्यम् आसीत्, यस्मिन् पञ्चायत-नागरीय-निर्वाचनेषु महिलाभ्यः पञ्चाशत्-प्रतिशतम् आरक्षणं क्रियान्वितं जातम्।

**सिक्किमः**

सिक्किम-राज्यस्य मुख्यमन्त्री पी.एस्.तमांगः राज्ये वर्तमानायाः आपत्स्थितेः समीक्षायै राज्यस्य मुख्य-सचिवेन वी.बी.पाठकेन अन्यैः च सह एकस्य उपवेशनस्य अध्यक्षतां कृतवान्। मुख्यसचिवेन मुख्यमन्त्रिणे साहाय्योद्धार-कार्य-पुनर्वास-विषयेषु भारतीय-सेनया सम्बद्ध-विभागैश्च सह समन्वयने राज्य-प्रशासनेन विहितानां पदक्षेपाणां विषये सूचना प्रदत्ता।

**छत्तीसगढम्/अनुरागसिंहठाकुरः**

केन्द्रीय-युवविषयक-क्रीडामन्त्री अनुराग-सिंह-ठाकुरः ह्यः छत्तीसगढस्य रायपुरे नेहरूयुवाकेन्द्र-संघटनेन आयोजितस्य द्वि-दिवसीय-राज्यस्तरीय-युवमहोत्सवस्य उद्घाटनं कृतवान्। कार्यक्रमं प्रबोधयन् मन्त्री अकथयत् यत् भारतस्य नम्रशक्तिः इतोऽपि सुदृढा भवेत् एतदर्थं क्रीडा-संस्कृति-चलचित्र-जगतां माध्यमेन कार्यं भवितुम् अर्हति। श्रीमता ठाकुरेण प्रशंसितं यत् चीनदेशे प्रवर्तमानासु एशिया-क्रीडासु भारतीय-क्रीडकानां श्रेष्ठप्रदर्शनेन देशः गौरवम् अनुभवति। असौ समाह्वानं कृतवान् यत् युवानः पर्यावरण-शिक्षा-स्वास्थ्य-स्वच्छता-मद्यमुक्ति-क्षेत्रेभ्यः एकं क्षेत्रं चिन्वन्तु।

**एशिया-क्रीडास्पर्धा**

चीनस्य हांगचोओ-इत्यत्र अनुवर्तमानासु एशिया-क्रीडास्पर्धासु भारतेन अधुनावधि षडशीतिः पदकानि विजितानि। भारतेन अधुनावधि 21 स्वर्णपदकानि, 32 राजतानि, 33 च कांस्यानि पदकानि जितानि। भारतं पदक- तालिकायां सम्प्रति चतुर्थं स्थानं भजते।

**क्रिकेट्**

आई.सी.सी.-विश्व-चषक-क्रिकेट् स्पर्धा-मालिकायाः प्रथमं द्वन्द्वं न्यूजीलैण्डेन जितम्। गतसायम् अहमदाबादे नरेन्द्र-मोदि-क्रीडांगणे समायोजिते द्वन्द्वे न्यूजीलैण्डेन इंग्लैण्ड-दलं नवभिः क्रीडकैः पराजितम्। पूर्वं इंग्लैण्डेन न्यूजीलैण्डस्य पुरतः त्र्यशीत्यधिक-द्विशत-धावनांकात्मकं विजयलक्ष्यं स्थापितम् आसीत्। अद्य हैदराबादे पाकिस्तान-नीदरलैण्ड्स-दलयोः स्पर्धा भविष्यति।

**।। इति वार्ता: ।।**